कालस्वरूपो भागोऽन्यः सर्वभूतानि चापरः। विनाशं कुर्वतस्तस्य चतुर्द्धैवं महात्मनः" विष्णुपु० १अंशे २१अ०। वेधाश्च रजोगुणप्रधानोपाधिकः कार्य्यब्रह्मा। ऋत्विग्भेदश्च अच्छावाकशब्दे ८५ पृ० दर्शितेषु प्रधानेषु चतुर्षु ऋत्विक्षु मध्ये एकतमः।"त्रयाणामपराधे तु ब्रह्मा परिहरेत् सदा" सामा० भाष्यधृतकारिका। "त्रयाणामध्वर्य्यूद्गातृहोतॄणां वेदत्रयविदां मध्ये ऋत्विगेको ब्रह्मनामको वेदत्रयमन्त्रतद्विहितकर्मविषये अपराधो न्यूनभावो यदि जायते तस्यापराधस्य परिहारं प्रतीकारं कुर्य्यात्" इति तदर्थः। "यज्ञस्य हैष भिषक् ब्रह्मेति" भाष्यधृतश्रुत्यन्तरम्। अतएवास्य कृताकृतावेक्षणार्थं वरणमन्यत्रोक्तम्। १०बृहस्पतौ च ब्रह्मपुरोहितशब्दे दृश्यम्।

**ब्(ब्र)ह्मनाल** न० ब्रह्मणो नालमिव। काश्यां मणिकर्णिकासमीपस्थे तीर्थभेदे। "पितामहेश्वरं लिङ्गं ब्रह्मनालोपरि स्थितम्। पूजयित्वा नरो भक्त्या ब्रह्मलोकमवाप्नुयात्। ब्रह्मस्रोतःसमीपे तु कृतं कर्म शुभाशुभम्। पराक्षयतामेति शुभमेव ततश्चरेत्। अनल्पमपि यत् कर्म कृतमत्र शुभाशुभम्। प्रलयेऽपि न तस्यास्ति प्रलयो मुनिसत्तम!। नाभीतीर्थमिदं प्रोक्तं नाभीभूतं यतः क्षितेः। अपि ब्रह्माण्डगोलस्य नाभिरेषा शुभोदया। सा मणिकर्णिकेयीयं नाभिगाम्भीर्य्यभूमिका। ब्रह्माण्डगोलकं सर्वं यस्यामेति लये लयम्। ब्रह्मनालं परं तीर्थं त्रिषु लोकेषु विश्रुतम्। तत्सङ्गमे नरः स्नातः कोटिजन्ममलं हरेत्। ब्रह्मनाले पतेद्दुयेषामपि कीकसमात्रकम्। ब्रह्माण्डमण्डपान्तस्ते न विशन्ति कदाचन" काशीख० ६१अ०।

**ब्(ब्र)ह्मनिर्वाण** न० ब्(ब्र)ह्मणि निर्वाणं निर्वृतिः। ब्(ब्र)ह्मभावलाभे सकलानर्थनिवृत्तिरूपे परमानन्दे "एषा ब्राह्मी स्थितिः पार्थ! नैनां प्राप्य विमुह्यति। स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति" गीता।

**ब्(ब्र)ह्मपत्र** न० ब्रह्मणः तन्नामकवृक्षस्य पत्रम्। पलाशपत्रे। "भोजनं ब्रह्मपत्रेषु कथया लोचनं हरेः। दर्शनं वैष्णवानाञ्च महापातकनाशनम्" पाद्मोत्तरख० ११८अ०।

**ब्(ब्र)ह्मपर्णी** स्त्री ब्(ब्र)ह्मेव विस्तीर्णानि मूलादारभ्य स्थितानि पर्णान्यस्याः ङीप्। पृश्निपर्ण्याम् राजनि०।

**ब्(ब्र)ह्मपवित्र** पु० ब्(ब्र)ह्मेव वेदोक्तकर्मणि वा पवित्रः। कुशे राजनि०।

**ब्(ब्र)ह्मपादप** पु० ब्(ब्र)ह्मणः प्रियः वैदिककर्मयोग्यत्वात् विप्रब्(ब्र)ह्मचारिधार्य्यदण्डार्थत्वाद्वा ब्रह्मनामकत्वात् वा पादपः। पलाशवृक्षे हेमच०। "पलाशो वै ब्रह्म" शत०ब्रा० पलाशवृक्षशब्दे दृश्यम्।

**ब्(ब्र)ह्मपुत्र** पु० ब्(ब्र)ह्मणः पुत्र इव कपिलवर्णत्वात्। १विषभेदे अमरः। तद्विषस्य लक्षणं भावप्र० उक्तं यथा "वर्णतः कपिलो यः स्यात्तथा भवति सारकः। ब्रह्मपुत्रः स विज्ञेयो जायते मलयाचले"। २उत्तरदेशप्रसिद्धे ३नदभेदे ४क्षेत्रभेदे च। ५सरस्वत्यां नद्यां स्त्री। तस्याः पितामहजातत्वं ब्रह्माणीशब्दे दृश्यम्। तस्य नदस्योत्पत्तिकथा "हरिवर्ष महावर्षं शान्तनुर्नाम नामतः। मुनिरासीन्महाभागो ज्ञानवान् सुतपोधनः। तस्य भार्य्या महाभागा अमोघाख्या महासती। हिरण्यगर्भस्य मुनेस्तृष्णच्छन्दाश्रमोद्भवा। तया सार्द्धं स कैलासमर्य्यादापर्वतेऽवसत्। लोहिताख्यस्य सरसस्तीरे वै गन्धमादने। एकदा स तपोनिष्ठो निजपुष्पादिगोचरे। जगाम वनमध्यन्तु चिन्वन् वल्कफलानि च। तस्मिन्नवसरे ब्रह्मा सर्वलोकपितामहः। तत्राजगाम यत्रास्ति अमोघा शान्तनोः प्रिया। तां दृष्ट्वा देवगर्भाभां युवतीमतिसुन्दरीम्। मोहितो मदनेनाशु तथाऽभूत् त्वरितेन्द्रियः। उद्दीरितेन्द्रियो भूत्वा जिघृक्षुस्तां महासतीम्। अथाधावत्तदा ब्रह्मा सम्मुखो मदनार्दितः। धावमानं विधातारं दृष्ट्वाऽमोघा महासती। मैवं मैवमिति प्रोच्य पर्णशालां व्यलीयत। इदञ्चोवाच धातारममोघा कुपिता तदा। पर्णशालान्तरगता द्वारमावृत्य तत्क्षणात्। अकार्य्यं न मया कार्य्यं मुनिपत्न्या विगर्हितम्। बलात् प्रमथ्या चाहं चेत्त्वया त्वाञ्च शपाम्यहम्। अमोघया चैवमुक्ते विधातुश्च तदा नृप!। रेतश्चस्कन्द च तदैवाश्रमे शान्तनोर्मुनेः। च्युते रेतसि धातापि हंसयानं समास्थितः। लज्जयातिपरीतात्मा द्रुतं वै स्वाश्रमं ययौ। गते वेधसि शान्तनुर्निजमाश्रममागतः। आगत्य दृष्ट्वा हंसानां पदक्षोभं तथा भुवि। तेजश्च पतितं भूमौ विधातुर्ज्वलनोपमम्। अमोघां परिपप्रच्छ पर्णशालान्तरस्थिताम्। किमेतदत्र शुभगे! प्रवृत्तं दृश्यते तु यत्। पक्षिणाञ्च पदक्षोभस्तेजश्चेदञ्च कीदृशम्। सा तस्य वचनं श्रुत्वा शान्तनुं मुनिसत्तमम्। अशङ्कितेव न्यगदद्दाकुला विकलानना। हंसयुक्तस्यन्दनेन कोऽप्यागत्य चतुर्मुखः।